वैशाख-शुक्ल-द्वादशी, सर्वजित्-संवत्सरः, युगाब्दः ५१०९

आदरणीय Professor Goldman महोदय, Chairman von Rospatt महोदय च

एकोत्तरशतवर्षाणि यावत् संस्कृताध्ययनाय अखण्डां व्यवस्थां कल्पितवन्तं California-राज्ये Berkeley-नगरे विद्यमानं विश्वविद्यालयं संस्कृतभारत्याः अमेरिकाशाखा सहार्दम् अभिनन्दति। ऊनचत्वारिंशदधिकशतवर्षात्मकेन इतिहासेन युक्तेन अनेन बहुमानितेन विश्वविद्यालयेन संस्कृतशिक्षणाय दत्तं प्राधान्यं दृष्टवतां विश्वस्य संस्कृतानुरागिणां सर्वेषां भवति महान् आनन्दः।

दैनन्दिनसम्भाषणार्थम् एषा भाषा एकम् उपकरणं भवतु इति मत्वा वयं संस्कृतभारत्याः कार्यकर्तारः कार्यं कुर्वन्तः स्मः। इयं भाषा जीवन्ती भवतु , जनाः प्राच्यनिधिं अवगच्छेयुः इति UC-Berkeley-विश्वविद्यालयस्य उद्देशः। अस्याः भाषायाः प्रचारः भवेत् , प्राच्यनिधिं विश्वस्य सर्वे जनाः जानीयुः इति संस्कृतभारत्याः उद्देशः। एतौ उभौ उद्देशौ परस्परान्वितौ स्तः।

UC-Berkeley-विश्वविद्यालये "संस्कृताध्ययनस्य इतिहासः" इत्यस्मिन् अपूर्वे लेखने उल्लिखितेभ्यः संस्कृतसेवनकार्येभ्यो दक्षिण - दक्षिणपूर्वैशियाध्ययन-विभागाय UC-Berkeley-स्थाय विश्वविद्यालयस्य दक्षिणैशियाध्ययनकेन्द्राय च हार्दान् धन्यवादान् समर्पयामः वयम्। विश्वविद्यालयस्य संस्कृतकार्यक्रमस्य यशसः कारणीभूताय सर्वस्मै सदस्याय अपि अस्माकं शुभाशंसाः।

भवद्भिः क्रियमाणे सेवाकर्मणि वयमपि सहभागिनः स्मः। अस्माकं पूर्णः विश्वासः अस्ति - महत्तमं कार्यं यद् UC-Berkeley-विश्वविद्यालयः करोति तत् इतोऽपि बहूनि वर्षाणि अनुवर्तिष्यते इति। भगवद्गीतायाः अनुवादे Professor Arthur W Ryder महोदयः लिखति - - " अगणिताः कोटिशः जनाः गीतायाः सकशात् आश्वासनं आनन्दञ्च प्राप्तवन्तः। स्वस्य कष्टानाम् अन्त्यम् अपि प्राप्तं तैः। कठिनकरम् अपि मोक्षमार्गं प्राप्तवन्तः ते " - संस्कृतभाषायाः अपि एषा एव स्थितिः इति वयं विश्वसिमः।

UC-Berkeley-विश्वविद्यालयस्य यादृशः प्रयत्नः तादृशेन एव महाप्रयत्नेन अस्याः संस्कृतभाषायाः प्रचारः भवेत्। चिरकालं यावत् एतत् कार्यं प्रवर्तताम्।

जयतु संस्कृतम्। जयतु मनुकुलम्।

भवदीयः,

संस्कृतभारती-कार्यकर्तृ-गणः।

**Samskrita Bharati, 1044 Lancer Drive, San Jose, CA 95129, USA**
SamskritaBharati@yahoo.com www.samskrita-bharati.org
Tel: 978-268-8406; Fax: 831-301-6972; EIN: 77-0545072;